

# ॥ श्रीकृष्ण स्तोत्राणि – ब्रह्मवैवर्त पुराणम् ॥

## Sri Krishna Stotras – Brahma Vaivarta Puranam

The following is a collection of rare, short and sweet prayers on **Lord Krishna** by **Lord Shiva, Lord Brahma, Lord Dharma and Goddess Sarasvati** taken from **Brahma Vaivarta Puranam, Brahma Khandam**, and **Chapter 3**.

**Phalashruti for Stotra By Lord Shiva** - One who recites the hymn by **Lord Shambhu** attains **Siddhi** in all his deeds and victory in every step. He also begets the increase in wealth, friendship and decrease in enemity, sorrows and miseries.

**Phalashruti for Stotra By Lord Brahma** – One who recites the hymn by **Lord Brahma** with devotion in the morning will get all his sins and ill-fame destroyed and begets Bhakti on **Lord Govinda** and fame.

**Phalashruti for Stotra by Lord Dharma** – One who recites the sacred 24 names of **Lord Krishna** that came out from the face of **Lord Dharma** in the mornings will live in comfort and be victorious and he does not develop taste in doing unrighteous deeds. He is bestowed with the rare capacity to chant the name of **Lord Hari** at the time of his soul leaving the body and reach the abode of and perform devotional services to **Lord Hari**.

**Phalashruti For Stotra By Goddess Sarasvati** – One who chants the hymn by **Goddess Vani** attains erudition, intellect and wealth.

## ॥ श्रीशम्भु-कृत श्रीकृष्ण स्तोत्रम् ॥

श्रीमहादेव उवाच –

जय-स्वरूपं जयदं जयेशं जय-कारणम् ।
प्रवरं जयदानां च वन्दे तं अपराजितम् ॥ १ ॥

विश्वं विश्वेश्वरेशं च विश्वेशं विश्व-कारणम् ।
विश्वाधारं च विश्वस्थं विश्व-कारण-कारणम् ॥ २ ॥

विश्व-रक्षा-कारणं च विश्वघ्नं विश्वजं परम् ।
फल-बीजं फलाधारं फलं च तत्फल-प्रदम् ॥ ३ ॥

तेजः-स्वरूपं तेजोदं सर्व-तेजस्विनां-वरम् ॥ ४ ॥

## ॥ फलश्रुतिः ॥

इति शम्भु-कृतं स्तोत्रं यो जनः संयतः पठेत् ।
सर्व सिद्धिर् भवेत् तस्य विजयं च पदे पदे ॥ ५ ॥

सन्ततं वर्धते मित्रं धनं ऐश्वर्यं एव च ।
शत्रु-सैन्यं-क्षयं-याति दुःखानि दुरितानि च ॥ ६ ॥

## ॥ श्रीब्रह्म कृत श्रीकृष्ण स्तोत्रम् ॥

ब्रह्मोवाच –
कृष्णं वन्दे गुणातीतं गोविन्दं एकमक्षरम् ।
अव्यक्तं अव्ययं व्यक्तं गोप-वेष-विधायिनम् ॥ १ ॥

किशोरवयसं शान्तं गोपीकान्तं मनोहरम् ।
नवीन-नीरद-श्यामं कोटि-कन्दर्प-सुन्दरम् ॥ २ ॥

वृन्दावन वनाभ्यर्णे रास-मण्डल-संस्थितम् ।
रासेश्वरं रासवासं रासोल्लास-समुत्सुकम् ॥ ३ ॥

## ॥ फलश्रुतिः ॥

इति ब्रह्म-कृतं स्तोत्रं प्रातरुत्थाय यः पठेत् ।
पापानि-तस्य-नश्यन्ति दुःस्वप्नः-सुस्वप्नो-भवेत् ॥ ४ ॥

भक्तिर् भवति गोविन्दे श्री-पुत्र-पौत्र-वर्धनी ।
अकीर्तिः-क्षयं-आप्नोति सत्कीर्तिर् वर्धते चिरम् ॥ ५ ॥

## ॥ श्रीधर्म कृत श्रीकृष्ण स्तोत्रम् ॥

श्रीधर्मोवाच–

कृष्णं विष्णुं वासुदेवं परमात्मानं ईश्वरम् ।
गोविन्दं परमानन्दं एकमक्षरं अच्युतम् ॥ १ ॥

गोपेश्वरं च गोपीशं गोपं गोरक्षकं विभुम् ।
गवामीशं च गोष्ठस्थं गो-वत्स-पुच्छ-धारिणम् ॥ २ ॥

गो-गोप-गोपी-मध्यस्थं प्रधानं पुरुषोत्तमम् ।
वन्दे अनवद्यं अनघं श्यामं शान्तं मनोहरम् ॥ ३ ॥

## ॥ फलश्रुतिः ॥

चतुर्विंशति नामानि धर्म वक्त्रोद्गतानि च ।
यः पठेत् प्रातरुत्थाय स सुखी सर्वतो जयी ॥ ४ ॥

मृत्यु-काले हरेर् नाम तस्य साध्यं भवेद् ध्रुवम् ।
स यात्यन्ते हरेः स्थानं हरि-दास्यं-भवेद्-ध्रुवम् ॥ ५ ॥

नित्यं धर्मस्तं घटते नाऽधर्म-तद्-रतिर्-भवेत् ।
चतुर्वर्ग-फलं तस्य शश्वत् करगतं भवेत् ॥ ६ ॥

तं दृष्ट्वा सर्व-पापानि पलायन्ते भयेन च ।
भयानि चैव दुःखानि वैनतेयं इवोरगाः ॥ ७ ॥

## ॥ श्रीसरस्वती कृत श्रीकृष्ण स्तोत्रम् ॥

श्रीसरस्वत्युवाच -

रास-मण्डल-मध्यस्थं रासोल्लास-समुत्सुकम् ।
रत्न-सिंहासनस्थं च रत्न-भूषण-भूषितम् ॥ १ ॥

रासेशवरं रासकरं वरं रासेश्वरं ईश्वरम् ।
रासाधिष्टातृ देवं च वन्दे रास-विनोदिनम् ॥ २ ॥

रासायास-परिश्रान्तं रास रास-विहारिणम् ।
रासोत्सुकानां गोपिनां कान्तं शान्तं मनोहरम् ॥ ३ ॥

## ॥ फलश्रुतिः ॥

इति वाणी-कृतं स्तोत्रं प्रातरुत्थाय यः पठेत् ।
बुद्धिमान् धनवान् सोऽपि विद्यावान् पुत्रवान् सदा ॥ ४ ॥

---

## ॥ इति श्रीब्रह्मवैवर्ते महापुराणे ब्रह्म-खण्डे श्रीकृष्ण-स्तोत्राणि सम्पूर्णम् ॥